# MUKULAM 2015

## MODEL QUESTION PAPER – SANSKRIT

## संस्कृतम्

STD.X

अङ्कः - 40
समयः - 90 निमेष

---

१- **कोष्ठात् समुचितमुत्तरं स्वीकृत्य लिखतु।**

(क) अतिथिदेवो भव –इति प्रसिद्धं सुक्तं कस्मिन् ग्रन्थे अन्तर्भवति?

(महाभारते, मुण्डकोपनिषदि, तैत्तिरीयोपनिषदि)

(ख) समर्थनीयस्यार्थस्य समर्थनम्- इति कस्य अलङ्कारस्य लक्षणः ?

(उत्प्रेक्षायाः, काव्यलिङ्गस्य, अर्थान्तरन्यासस्य)

(ग) तपोवनस्वामिना विरचितं जीवनचरितं किम्?
(ईश्वरदर्शनम्, कैलासयात्रा, विभाकरं)

२- **यथोचितं योजयत ।**

| | | |
|---|---|---|
| १. स्थापत्यवेदः | - | निरन्तरम् |
| २. ज्ञानकाण्डः | - | पालिभाषा |
| ३. मरत्तुकली | - | वृक्षरोपणम् |
| ४. अजस्रम् | - | वास्तुविद्या |
| ५. कुम्भजातकम् | - | धैषणिकसंवादः |
| | - | वेदान्तः |

३- **अधोदत्तेषु उपनिषदः काः इति चित्वा लिखतु।**

तैत्तरीयम् , मयमतम् , भगवद्गीता, ईशावास्यम् , विष्णुयमकम्,
बृहदारण्यकं , ऋक्संहिता , मुण्डकम्

- **सम्भाषणांशं पूरयत।** 4

विनया - अमृते, त्वं विद्यालये ह्यः नागता।...................?

अमृता - मम पिता आतुरालये अस्ति।

विनया - पितुस्ते किमभवत् ?।

अमृता - ---------------------------------------------?

विनया - आम्। इदानीं सर्वत्र सांक्रमिकज्वरः अस्ति।

अमृता - श्वोसोच्छ्वासं कर्तुमपि पिता नितरां क्लिश्यति।

विनया - ..................................?

अमृता - आम्। दिनं प्रति बहुवारं स धूमपानं करोति ।

विनया - .......................................।

- **लवस्य स्वभावमधिकृत्य सूचनानुसारं लघूपन्यासं लिखतु।** 5

सूचनाः - उत्तररामचरितम् - भवभूतिः- यागाश्वबन्धनम् - धीरता - प्रायोगपाटवं- क्षात्रवीर्य - निर्भयता - युद्धसन्नद्धता ।

- 'सज्जनैः सह शत्रुता अपि वरम्' **-इत्याशययुक्तं श्लोकं चित्वा लिखतु ।** 2

१ विधाय रक्षान् परितः परेतरान्
अशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः।।

२. तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसंगमा-
द्वरं विरोधोपि समं महात्मभिः।।

**उदाहरणानुसारं समस्तपदं लिखतु ।** 1

उदाः- प्रियं च हितं च - प्रियहितम् ।

इष्टं च अनिष्टं च - ------------------।

**७-सूचनानुसारं जीवचरित्रं लिखतु** 5

| | | |
|---|---|---|
| नाम | - | डा०. हेर्मन् गुण्टर्ट्। |
| जन्मः | - | १८१४ फेब्रुवरि ४ । |
| जन्मस्थलः | - | जर्मन् देशे स्टुट्गार्ट् नगरे । |
| विद्याभ्यासः | - | बहुभाषा पण्डितः । |
| कर्मक्षेत्रं | - | क्रिस्तुमतप्रचरणम् । |
| ग्रन्थाः | - | केरलोत्पत्ति, केरलपळमा, पळञ्चोल् माला। |
| मरणम् | - | १८९३ एप्रिल् २५ |

**८-सूचनानुसारं दिशानिर्णयम् अधिकृत्य लघूपन्यासं लिखतु।** 5

सूचना- भूमेः समीकरणम्- शङ्कुस्थापनम् – छायायाः अङ्कनम्- ब्रह्मसूत्रम्- वृत्तसङ्गमम्- दक्षिणोत्तररेखा- यमसूत्रम्।

**९- त्रिविधा श्रद्धा काः ?** 1

**१०- रेखाङ्कितस्य पदस्य उचितविभक्तिरूपेण वाक्यं शुद्धं करोतु।** 2

सः <u>मद्यपानस्य</u> विरराम।

**११- उदाहरणानुसारं पदच्छेदं लिखत।**

उदाः- तच्च - तत् च

अन्यच्च - ..................

**१२- खण्डिकां पठित्वा मातृभाषायां अनुवर्ततयतु ।** 5

शार्ङगधरसंहिता इति प्रसिद्धस्य आयुर्वेदग्रन्थस्य कर्ता अस्ति शाङ्र्गधरः। क्रिस्तोः परं त्रयोदशशतकं भवति तस्य जीवनकालः। शाङ्र्गधरसंहितायां वृक्षायुर्वेदम् अधिकृत्य च प्रतिपादयति। गृहसमीपे आरामनिर्माण कथं करणीयम् इति तस्मिन् विस्तरेण विवृणोति। प्रकृतिसंरक्षणविषये प्राचीनानां ज्ञानं विपुलमासीदिति ज्ञातुं अस्य ग्रन्थस्य पठनेन शक्यते।।